AD EDUXIAN JOURNAL
A Quarterly Multidisciplinary Blind Peer Reviewed & Refereed Online International Journal
Google Scholar Indexing IF:3.125(IIFS)
Vol (2), Issue (2), May-July 2025 ISSN: 3048-7951

# अर्जुनरावणीयग्रन्थे अङ्गकार्यम्

राकेश कुमारः[1]

DOI: https://doi-ds.org/doilink/08.2025-49899397/ADEDJ/V2/I2/RK
Review: 08/07/2025 Acceptance: 20/07/2025 Publication:14/08/2025

सार: संस्कृत साहित्य में व्याकरण शास्त्र का बहुत ही महत्व है व्याकरण शास्त्र को मुख कहा गया है महर्षि पाणिनि द्वारा रचित अष्टाध्यायी नामक ग्रंथ में अंग कार्य के विषय में कहा गया है जब भी धातु से प्रत्यय किए जाएंगे तब प्रत्यय को मान करके जो कार्य किया जाता है वहां अंग कार्य होता है अंग कार्य में वर्ण अक्षर को मान करके नहीं होता है।

षष्ठाध्यायस्य चतुर्थपादस्य प्रथममङ्गस्येति अधिकारसूत्रम् । अस्यैवाऽधिकारोऽङ्गाधिकारः कथ्यते। अधिकार उत्तरोत्तरसूत्रेषु पूर्वस्याधिकृतस्य पदस्य सूत्रस्य वाऽनुवृत्तिर्निगद्यते। अङ्गस्येत्यपि सूत्रमुत्तरत्राऽनुवर्तते। अत इदमप्यधिकारसूत्रम्। अत्रत्याङ्गशब्दस्तदुत्तरषष्ठ्याश्वार्थः, अधिकारस्य सीमा, अधिकारस्य प्रयोजनानि चेति सर्वं विचार्यतेऽत्राध्याये। यद्यप्यापाततो महाभाष्यावलोकनेनाऽधिकारोऽयं निष्फलं प्रतीयते तथापि वव्रश्चेतिप्रयोगस्य साधनाय वर्णादाङ्ग वलीयः इति परिभाषायाः सार्थक्याय तद्वारा इयाय इत्यादिशब्दसिद्धये चाङ्गाधिकार आवश्यक इति मन्ये। एवम् अत्र इमे विषया विचारणीयाः सन्ति।

(क) अङ्गशब्दार्थः।

(ख) अङ्गाधिकारस्य प्रयोजनानि।

अथेमौ विषयौ अत्र क्रमेण निरूप्येते-

(क) अङ्गशब्दार्थः

अङ्गस्येतिपदस्य प्रकृतिरङ्ग विद्यते। प्रत्यये परे तत्प्रकृत्यादि शब्दस्वरूपं तदादिशब्देन विवक्षितम्। अङ्गसंज्ञाविधायकस्य प्रकृतसूत्रस्येयं वृत्तिर्वैयाकरणसिद्धान्तकौमुद्यां कृता -

यः प्रत्ययो यस्मात् क्रियते तदादि शब्दस्वरूपं तस्मिन् प्रत्यये परेऽङ्गसंज्ञं स्यात्। अङ्गसंज्ञाया उदाहरणानि भवामि इत्यत्र भव इति, भविष्यामि इत्यत्र भविष्य इति, रामैः इत्यत्र राम इति च सन्ति। तत्र भवामि इत्यत्र भू इति धातुरूपशब्दान्मिप् (लट्) प्रत्ययो विहितः। स भूशब्दः भू अ = भव इति शब्दस्वरूपस्यादिरस्ति। अतो भू अ = भव इति शब्विशिष्टं शब्दस्वरूपमङ्गं कथ्यते। एवं भविष्यामि इत्यत्र भूधातुरूपशब्दात् प्रकृतिभूतान्मिप् (लिट्) विहितः। भूधातुरूपं तच्छब्दस्वरूपं भू इष्य = भविष्य इति शब्दस्वरूपस्यादिरस्ति।

[1] राकेश कुमारः शोधच्छात्रः व्याकरणविभागः केन्द्रीयसंस्कृतविश्वविद्यालयः वेदव्यासपरिसरः बलाहरः हिमाचलप्रदेशः मो.9625605601 rakeshjejwin@gmail.com

अतो भू इष्य = भविष्य इत्यङ्ग भवति। एवं भवेति भविष्येति च क्रमेण लटो लिटश्च मिपि प्रत्यये परेऽङ्गसञ्ज्ञे भवतः । अत एव अतोदीर्घो यत्रि इति सूत्रेण दीर्घो भवति। विकिरणविशिष्टानां भव भविष्यप्रभृतीनामङ्गसञ्जार्थं सूत्रे तदादि इति प्रोक्तम्। यदि तदिति अकथितमभविष्यत्तदा भू इत्यस्यैवाङ्गत्वमभविष्यदङ्गस्यादन्तत्वाभावेन दीर्घो नाऽसेत्स्यच्च। रामैः इत्यत्र भिसि रामेति शब्दस्वरूपमेकमेव यद्यपि विद्यते तथापि तस्य व्यपदेशिवद्भावेनाङ्गत्वं भवति। अतस्तत्र तदादीति कथने तत्र रामेति शब्देऽङ्गसंज्ञाया अव्याप्तिर्न शङ्कनीया। एतद् सूचयति नागेशभट्टः।

अङ्गसञ्जासूत्रे स्त्री इयती दधि अधुना इत्यादौ स्त्री दधि प्रभृतीनामङ्गसञ्जाया वारणाय प्रत्ययविशिष्टस्याङ्गत्वेऽङ्गसञ्ज्ञायाः प्रत्ययनिमित्तत्वं न विधिरिति, स्यात् ।ततश्चाङ्गेन प्रत्ययाक्षेपाभावे वव्रश्चेति न सिद्ध्येत। तत्र ह्युरदत्वस्य प्रत्ययरूपपरनिमित्तकत्वाभावे अचः परस्मिन् पूर्वविधौ इति स्थानिवत्त्वाभावेन सम्प्रसारणत्वाभावे वकारस्यापि सम्प्रसारणं स्यात्। अधिकमग्रे स्फुटीभविष्यति। किञ्च प्रत्ययविशिष्टस्याङ्गत्वे राजपुरुषः इत्यत्र न लुमताङ्गस्य इति निषेधेन पूर्वपदे पदत्वाभावेन नलोपो न स्यात्। ततोऽप्यधिकस्य अङ्गसञ्ज्ञायां देवदत्त ओदनमपाक्षीत् इत्यादौ देवदत्तादिशब्दोत्तरं सुपं निमित्तीकृत्य लुङ्ङ्गपूर्वभागस्याप्यङ्गत्वेन लुपरत्वेन च देवदत्तशब्दादपि पूर्वमडागमः स्यात्। इदमत्र वक्तुं न शक्यते यद् लुङ्लङ्लृङ्घवड्डदात्तः अनेन सूत्रेण लुङादिनिरूपितस्याङ्गस्याङ् भवतीति, यतोहि प्रत्ययनिमित्तत्वाभावेन लुङादिनिरूपितस्याऽङ्गस्याङ् इत्यर्थः कर्तुं न शक्यते। इदमपि नागेशेन कथितम्। एवमङ्गसञ्ज्ञासूत्रे तदादि विधि -प्रत्ययशब्दाः साभिप्रायाः। उक्ताङ्गसञ्ज्ञाविधायकसूत्रविमर्शन स्पष्टं भवति यद् यस्माद् यः प्रत्ययो विधीयते तस्मिन् प्रत्यये परे पूर्वं तदादि तच्च शब्दस्वरूपमङ्गं कथ्यते। अयमेवाङ्गशब्दस्य शब्दविशेषो व्याकरणेऽर्थः ।

(ख) अङ्गाधिकारस्य प्रयोजनानि

अङ्गाधिकारः सप्रयोजन इति सिद्धान्तपक्षः। अङ्गाधिकरो निष्प्रयोजनः, अर्थवद्वहणादिपरिभाषाभिरेवाङ्गाधिकारप्रयोजनानां सिद्धत्वादिति पूर्वपक्षः। तत्रादौ सिद्धान्तपक्षोपन्यस्यते तदनन्तरं पूर्वपक्षस्थापनापुरःसरं सिद्धान्तपक्षस्य स्थापनं करिष्यते।(१) अङ्गाधिकारः सप्रयोजनः भगवता महाभाष्यकारेणाङ्गस्येति-सूत्रेऽङ्गाधिकारस्य नैकानि प्रयोजनानि कथितानि, यत्र बहुषु कार्येष्वतिव्याप्तिवारणमेव प्रयोजनत्वेन प्रतिफलति। तथाहि

सम्प्रसारणदीर्घत्वेऽतिव्याप्तिवारणम् हलः इति सूत्रेण सम्प्रसारणस्य दीर्घो विधीयते। यदाऽङ्गाधिकारो भवति तदाऽस्मिन् सूत्रेऽङ्गस्येति सूत्रमनुवर्तते। अनुवृत्तं तदावृत्या हला सम्प्रसारणेन च सम्बद्धयते। तेन हल् विशेष्यते।

अङ्गस्येत्यावृत्तं सम्प्रसारणस्य विशेष्यं भवति। अतः सम्प्रसारणविशेषणेन तदन्तविधिर्भवति। ततः हलः इत्यस्य सूत्रस्य अङ्गस्य हलः = समुपसर्गपूर्वकं व्येञ् संवरणे इति धातोश्च क्ते सम्प्रसारणे पूर्वरूपे च कृते (हु तः) इत्यत्र (संवि तः) इत्यत्र चहुवि रूपाङ्गयोरवयवाभ्यां हकार वकाराभ्यां हल्भ्यामुत्तरयोः सम्प्रसारणयोरुकारेकारदीर्घो भवति, हूतः इति संवीतः इति च सिद्ध्यति। एवं ज्या वयोहानौ इति धातोः श्विधातोश्व क्ते सम्प्रसारणे पूर्वरूपे निष्ठानत्वे सम्प्रसारणयरिकारोकारयोर्दीर्घत्वेजीन इति शून इति च प्रयोगौ सिद्ध्यतः।

यदाङ्गाधिकारो न स्यात्तदा हलः इति सूत्रस्य हल उत्तरस्य सम्प्रसारणस्य दीर्घो भवति इत्यर्थो भवेत्। तदा (निर् उतम्) निरुतम् इत्यत्र (दुर् उतम्) दुरुतम् इत्यत्रचापि सम्प्रसारणस्य उकारस्य दीर्घः स्यात्। वेञः क्ते सम्प्रसारणे पूर्वरूपे च उतम् इति भवति। तत्रोकारस्य वकाररूपयणः

स्थाने जातत्वेन सम्प्रसारणत्वं रेफरूप हल उत्तररत्वं विद्यत एव। ततः निरूतम् इति दुरूतम् इति चानिष्टे रूपे भवेताम्। अङ्गाधिकारे तु नानिष्टरूपप्रसक्तिः। यतो हि रेफो नाङ्गस्यावयवः, अपितु स उपसर्गस्यावयवः। अङ्गन्त्वत्र उ इत्येव विद्यते, क्तस्योपसर्गहीनादे वेञ विहितत्वात्।

इत्थं निरुतम्, दुरुतम्, इत्यादौ हलः इति सूत्रेण विहितस्यसम्प्रसारणदीर्घत्वस्यातिव्याप्तिर्न भवेदित्यङ्गाधिकार आवश्यकः। तस्मात् सम्प्रसारणदीर्घत्वेऽतिव्याप्तिवारणमङ्गाधिकारस्य प्रयोजनम्।

(क) आमो नुडिवधावतिव्याप्तिवारणम्

ह्रस्वनद्यापो नुट् अनेन सूत्रेण ह्रस्वान्ताद्यङ्गात् परस्यामो नुड् विधीयते। तेन (कुमारी आम्) इति स्थितौ कुमारीणाम् इत्यादि सिद्ध्यति। अत्र नद्यन्तत्वात् परत्वेनामोनुट्। सत्यङ्गाधिकारे प्रत्यासत्या प्रत्यय एवाम् गृह्यते। अन्यथा प्रत्ययाप्रत्ययसाधारणस्यामो ग्रहणं स्यात्। ततश्च (कुमारी आम्) इत्याह इत्यत्रापि स्वीकारबोधकस्यामो नुट् स्यात्। प्रत्ययभिन्नस्यामो नुटो वारणार्थमङ्गाधिकारावश्यकः ।

(ख) नामि दीर्घत्वेऽतिव्याप्तिवारणम्

सत्यङ्गाधिकारेऽजन्तस्याङ्गस्य नामि दीर्घ इति नामि इति सूत्रस्यार्थः, सम्पद्यते। ततश्व (अग्नि नाम) इति स्थितौ अग्निनाम्, (वायु नाम) इति स्थितौ वायुनाम् इत्यादे दीर्घो भवति। यदाऽङ्गाधिकारो न

स्यात्तदा क्रिमिणाम् इत्यत्र पापनाम् इत्यत्र चापि दीर्घो भवेत्। क्रिमि-पापशब्दाभ्यां पामादित्वान्नप्रत्यये टापि द्वितीयेकवचने क्रिमिणामिति पामनामिति च रूपे भवतः। अङ्गाधिकाराभावे नामीति सूत्रस्य अजन्तस्य प्रातिपदिकस्य दीर्घो नामि इत्यर्थे जाते

AD EDUXIAN JOURNAL
A Quarterly Multidisciplinary Blind Peer Reviewed & Refereed Online International Journal
Google Scholar Indexing IF:3.125(IIFS)
Vol (2), Issue (2), May-July 2025 ISSN: 3048-7951

क्रिमि-पापप्रातिपदिकाराकारय दीर्घत्वे क्रिमीणाम् इति पामानाम् इत्यनिष्ट रूपे स्याताम्। अङ्गाधिकारे सति नामितिप्रत्ययनिरूपितस्यैवाङ्गस्य दीर्घो भवति। क्रिमीत्यादौ तु न नाम्निरूपितमङ्गत्वम्, अपितु नप्रत्ययनिरूपितमेव। तस्मान्नात्र दीर्घत्वम्।१एवं नामीति दीर्घत्वेऽतिव्याप्तिवारणं प्रयोजनमङ्गाधिकारस्य लक्षणप्रतिपदोक्तपरिभाषया क्रिमिणाम् इत्यादौ दीर्घो वारयितुं न शक्यते। यतो हि क्वचिदपि प्रतिपदोक्तो नाम् न लभ्यते। षष्ठीबहुवचनं नाम् अपि नुडागमे निष्पन्न इति न सोऽपि प्रतिपदोक्तः। अतोऽङ्गाधिकाराभावे क्रिमिणाम् इत्यादौ दोषः स्यादेव। एतत् स्पष्टं कैयटप्रदीपे ।

(ग) लिङि एत्वेऽतिव्याप्तिवारणम्

अङ्गाधिकारे सति वान्यस्य संयोगादेः इति सूत्रस्यार्थो भवति यद् हवादिभिन्नस्य संयोगादेराकारान्तस्याङ्गस्य एकारादेशो भवति लिङि परतो विकल्पेन। ततश्व ग्ला म्ला इत्यादीनामङ्गानां गकारलकारादिसंयोगादित्वेनैत्वे लिङि (ग्लेयात्, म्लेयात्) इत्यादीनां सिद्धिर्भवति। अङ्गाधिकाराभावे संयोगादेरकारान्तस्य लिङि वैत्वं स्यादिति प्रकृतसूत्रस्यार्थः स्यात्। ततश्च (निर्यायात्, निर्वायात्) इत्यत्रापि

पाणिनीयव्याकरणेऽङ्गाधिकारविमर्शः (डॉ० वरुणकुमारमिश्रः)

या-धातोर्वाधातोश्वापि रेफयकाररूपसंयोगादित्वेनैत्वं स्यात्। अङ्गाधिकारे तुन दोषः। या धातोर्वाधातोश्चैव लिङितन्निरूपिता ङ्गत्वेन यावाऽङ्गयोः संयोगादित्वाभावेन नैत्वस्य प्रसङ्गः। निर्या इत्युपसर्गविशिष्टं नाङ्गम्, ततो लिङो विहितत्वाभावादित्याशयः। एवं लिङि एत्वेऽतिव्याप्तिवारणं प्रयोजनमङ्गाधिकारस्य।

निष्कर्षः

यस्मात् प्रत्ययो विधीयते तदादि शब्दस्वरूपमङ्गं कथ्यते। अङ्गस्य इत्यत्र षष्ठ्याः सम्बन्धसामान्यमर्थः। यथा देवदत्तस्य इत्यत्र। सम्बन्धि विशेषसमभिव्याहारे सा सम्बन्धविशेषे पर्यवस्यति। अङ्गाधिकारस्य सीमा सप्तमाध्यायस्य समाप्तिः। तेन वव्रश्च इतीष्टरूपसिद्धिः। निरुतम्, क्रिमिणाम्, दधि सनोति इत्यादौ सम्प्रसारणादिदीर्घातिवारणमङ्गाधिकारस्य प्रयोजनम्। अर्थवदादिविभिन्नपरिभाषाश्रयणेन सूत्राखण्डनस्य प्रत्यये इत्यधिकारस्य निष्प्रयोजनत्वेन च, वार्णादाङ्ग वलीयः चाऽयुक्तत्वेन इत्यादिपरिभाषावैयर्थ्यप्रयुक्तेयायादिरूपासिद्धिः, अचोणिति इत्यादावङ्गस्य तदन्तविधेरभावे चिकाय इत्यादिशब्दनिष्पत्तेश्चाङ्गाधिकार आवश्यक इति सिद्धान्तः सुप्रयुक्तः।नामि - नामि परेऽजन्ताङ्गस्य दीर्घः स्यात्।

न तिसृचतसृ - तिसृ चतसृ इत्येतयोः नामि दीर्घा न भवति ।

अप्मृन्तृच्स्वसृनप्तृनेष्टत्वष्ट्टक्षत्तृहोतृपोतृप्रशास्तृणाम् -

अबादीनामुधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।

आहूतस्सपदि पतिर्महीपतीनां योद्धृणां परममतः परेण युद्धे। विद्यानां स चतसृणामपि प्रयोक्ता भेत्ता वा युधि तिसृणां पुरां पिनाकी।।१

अन्वयः - तिसृणां पुरां भेत्ता पिनाकी वा योद्धृणां परममतः, चतसृणाम् अपि विद्यानां प्रयोक्ता महीपतीनां पतिः सः सपदि परेण युधि आहुतः।

टिप्पणी अस्मिन् श्लोके सूत्रोदाहरणभूतानि पञ्च-अङ्गपादीय पदानि सन्ति।

(१) आहूतः

(२) महीपतीनाम्

(३) योद्धृणाम्

(४) चतसृणाम्

(५) तिसृणाम्।

आहूतः

आङ् उपसर्गपूर्वकं वेञ् स्पर्धायाम् धातोः आदेच उपदेशेऽशितिः अनेन सूत्रेण आत्वे (आ ह्वा) क्तक्तवतु निष्ठार अनेन सूत्रेण क्त प्रत्यये अनुबन्धलोपेत शेषे (आ ह्वा त) वचिस्वपियजादीनां किति अनेन सूत्रेण सम्प्रसारणे (आ हु उ आत) अङ्गस्य इत्यधिकारसूत्रान्तर्गते हलः अनेन सूत्रेण दीर्घ (आ हुऊ आत) सम्प्रसारणाच्च अनेन सूत्रेण पूर्वरूपे (आहूत) अर्थवदधातुरप्रत्ययः प्रातिपदिकम् अनेन सूत्रेण प्रातिपदिकसञ्ज्ञायाम्, प्रथमाविभक्तेः एकवचने सु-प्रत्यये अनुबन्धलोपे स् -शेषे सस्य विरामोऽवसानम्७ अनेन सूत्रेण अवसानसञ्ज्ञायाम्, खरवसानयोर्विसर्जनीयः ८ अनेन सूत्रेण विसर्गे (आहूतः) इति प्रयोगः सिद्धः।

योद्धृशब्दस्य प्रातिपदिकसञ्ज्ञायाम् षष्ठी विभक्तेः बहुवचने आम् -प्रत्यये (योद्धृ आम्) ह्रस्वनद्यापो नु न् शेषे (योद्धृ न् आम्) नामि अनेन सूत्रेण नुडागमे अनुबन्धलोपे अनेन सूत्रेण दीर्घ (योद्धृनाम्) ऋवर्णान्नस्य णत्वं वाच्यम् अनेन वार्तिकेन णत्वे (योद्धृणाम्) इति प्रयोगः सिद्धः।

चतसृणाम्

चतसृ - शब्दस्य प्रातिपदिकसञ्ज्ञायां षष्ठी विभक्तेः बहुवचने आम् -प्रत्यये (चतसृ आम्) ह्रस्वनद्यापो नु अनेन सूत्रेण नुडागमे अनुबन्धलोपे न् शेषे (चतसृ न् आम्) नामि२ अनेन सूत्रेण दीर्घ प्राप्ते परञ्च न तिसृचतसृ अनेन सूत्रेण दीर्घ निषेधे (चतसृ नाम्) ऋवर्णान्नस्य णत्वं वाच्यम् अनेन वार्तिकन णत्वे (चतसृणाम्) इति प्रयोगः सिद्धः।

राजानम्

राजन् - शब्दस्य द्वितीयाविभक्त्येकवचने अमि प्रत्यये (राजन् अम्) इति स्थितौ सुडनपुंसकस्य अनेन सूत्रेण सर्वनामसथानसञ्ज्ञायां सर्वनामस्थाने चाऽसम्बुद्धौर अनेन सूत्रेण उपधादीर्धे (राजानम्) इति प्रयोगः।

राजा

राजन् - शब्दस्य प्रथमाविभक्त्येकवचने सु प्रत्यये (राजन् सु) इति स्थितौ सुडनपुंसकस्य अनेन सूत्रेण सर्वनामस्थानसञ्ज्ञायां सर्वनामस्थाने चाऽसम्बुद्धौ अनेन सूत्रेण उपधादीर्धे नलोपः प्रातिपदिकान्तस्य५ अनेन सूत्रेण नकारलोपे (राजा सु) इति स्थितौ हल्ड्याभ्यो दीर्घात्सुतिस्यपृक्तं हल् अनेन सूत्रेण सु - लोपे (राजा) इति प्रयोगः।

त्वष्टा

त्वष्ट शब्दस्य प्रातिपदिकसञ्ज्ञायां प्रथमाविभक्त्येकवचने सु-प्रत्यये (त्वष्ट सु) इति स्थितौ ऋदुशनस्पुरुदंशोऽनेहसां च अनेन सूत्रेण अनङादेशे अनुबन्धलोपे अन् शेषे (त्वष्टन् सु) इति स्थितौ अप्मृन्तृच्स्वसृनप्तृनेष्टत्वष्टक्षत्तृहोतृपोतृप्रशास्तृणाम् अनेन सूत्रेण उपधादीर्घ (त्वष्टान् सु) हल्ड्याभ्यो दीर्घात्सुतिस्यपृक्तं हल् अनेन सूत्रेण स् लोपे नलोपः प्रातिपदिकान्तस्य७ अनेन सूत्रेण नकारलोपे (त्वष्टा) इति प्रयोगः।

च्युतार्यमाणि

अर्यमन् - शब्दस्य प्रथमाविभक्त्यबहुवचने जस् प्रत्यये जश्शसोः शिः५ अनेन सूत्रेण जस् स्थाने शि आदेशे अनुबन्धलोपे इशेषे (अर्यमन् इ) इति स्थितौ इन्हन्पूषार्यम्णां शौ६ अनेन सूत्रेण उपधादीर्घ (अर्यमानि) अट्कुप्वाड्नुम्व्यायेपि७ अनेन सूत्रेण नस्य णत्वे च कृते अर्यमाणि इति प्रयोगः। च्युतानि अर्यमाणि च्युतार्यमाणि इति प्रयोगः।